कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

११०

श्रीकार्त्तिकमाहात्म्यसारोद्धारप्रारंभः॥पत्र १००

Acc. No:- ~~2307~~ M1359

Title:- कार्तिक महात्म्य

Author:- व्यास

subject:- पुराण

Date:- शके 1758.

पत्र:- 200

K K S U LIBRARY
RAMTEK
441 106
M 1359
Dist Nagpur

Checked 2012

1

श्रीगणेशायनमः॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥ देवींसरस्वतींव्यासंततोजयमुदीरये
त्॥१॥ ऋषयउचुः॥ सूततेकथितंपुण्यंमाहात्म्यंमाधवस्यच॥ भूयोन्यश्रोतुमिछामिकार्त्तिक
स्यचवैभवं॥२॥ कलौकलुषचित्तानांनराणांपापकारिणां॥ संसाराब्धौनिमग्नानामनायासेन
कागतिः॥३॥ कोधर्मःसर्वधर्माणांमध्येकोमोक्षसाधकः॥ इहादिमुक्तिदोनृणामेतत्वंकथयप्र
भो॥३॥ सूतउवाच॥ भवद्भिर्यदहंपृष्टोतदेतत्पृष्टवान्मुनिः॥ नारदोब्रह्मणःपुत्रोब्राह्मणंतुज
गद्गुरुं॥४॥ नारदउ॥ भगवंस्त्वद्दासोस्मिभक्तोस्मिचतुरानन॥ वेहमवंब्रूहिमेधर्मंसर्वपापवि
नाशनं॥५॥ सर्वेषामेवमासानांमाहात्म्यंतन्मुखात्श्रुतं॥ कार्त्तिकस्यतुमाहात्म्यंनश्रुतंतुमयानघ
॥६॥ तदद्कथयैवत्वंपाब्रह्मन्शिष्यस्तेहंपितामह॥ तस्मिन्मासेतुकर्तव्यंधर्मान्मेसकलान्वद॥७॥ब्र
ह्मोवाच॥ साधुपृष्टंत्वयावत्सलोकोद्धरणहेतवे॥ कथयामिनसंदेहस्त्वत्समोनास्तिवैष्णवः॥न॥

धर्मास्तु बहवः संति भुक्तिमुक्तिफलप्रदाः ॥ तथाप्यूर्जस्य मासस्य कलां नार्हंति षोडशीं ॥९॥ एकतः
सर्वतीर्थानि सर्वदानानि चैकतः ॥ एकतः कार्त्तिको वत्स सर्वपुण्याधिको मतः ॥१०॥ यत्किंचित्कुरु
ते पुण्यं विष्णुमुद्दिश्य कार्त्तिके ॥ तदक्षयं भवेत्सर्वं सत्यमुक्तं हरिप्रियं ॥११॥ न कार्त्तिकसमो मासो
न कृतेन समं युगं ॥ न वेदसमं शास्त्रं न तीर्थं गंगया समं ॥१२॥ एतादृशं कार्त्तिकं तु अव्रतेनैव यो न
येत् ॥ पूर्वकृतस्य पुण्यस्य क्षणमाप्नोत्यसंशयं ॥१३॥ नारद उ० ॥ कदारंभो व्रतस्यास्य कर्त्तव्यः को वि
धिः स्मृतः ॥ दानं च किं वा कर्त्तव्यं कस्य देवस्य पूजनं ॥१४॥ उद्यापनं कदा कार्यं को वा तस्य विधिर्भवेत् ॥
एतदन्यच्च भगवन्वक्तुमर्हस्यशेषतः ॥१५॥ ब्रह्मोवाच ॥ आश्विने शुक्लपक्षस्य दशम्यामारभेद्व्र
ती ॥ कार्त्तिकस्य तु मासस्य पौर्णमास्यां समापयेत् ॥१६॥ तुलासंक्रममारभ्य वृश्चिके वा समापयेत् ॥
नवमीदिवसे प्राप्ते कृत्वोपोषणमादितः ॥१७॥ स्वस्तिवाचनपूर्वं तु सार्थं संकल्पमाचरेत् ॥ मंत्रेण

नेन मोक्तुम्प्रीत्यर्थं मुरवैरिणः ॥१८॥ दामोदर जगन्नाथ देवकीनंदनाव्यय ॥ नरकांतक भूभार
संहारैककृतोद्यम ॥१९॥ प्रीत्यर्थं तव देवेश कार्त्तिकव्रतमुत्तमं ॥ करिष्यामि च निर्विघ्नं मामासंकु
रु माधवं ॥२०॥ गत्वा ग्रामाद्बहिः शौचं कृत्वास्यंतसमाहितः ॥ दंतधावनपूर्वाणि कृत्वा कर्माण्यनेकशः
॥२१॥ ललाटे चोर्ध्वपुंड्रं तु धृत्वा त्वाचम्य वारिणा ॥ धृत्वा त्वाकाशदीपं तु देवस्यापि च भक्तितः ॥२२॥ तु
लस्याः संन्निधौ दीपादेपावसं यथाविधि ॥ गीतैर्वाद्यैस्तथा नृत्यैर्जयघोषैस्तवैरपि ॥२३॥ महोत्स
वं तु कृत्वैवं कुर्यान्नीराजनं बुधः ॥ देवस्य च तुलस्याश्च पठन्मंत्रं शुचिः पुमान् ॥२४॥ घटिकाद्वयशिष्टायां
रात्र्यां गच्छेज्जलाशयं ॥ तदा स्नानं प्रकुर्वीत देवेशप्रीतये व्रती ॥२५॥ स्नानं सर्वौघविध्वंसि स्नानं सर्वा
र्थसाधनं ॥ न स्नानसदृशं किंचित्त्रिषु लोकेषु विद्यते ॥२६॥ स्नानमूलाः क्रियाः सर्वाः स्नानहीनाः क्रिया
वृथा ॥ तस्मात्स्नानं प्रयत्नेन सदा कार्यं मनीषिभिः ॥२७॥ नित्यं स्नातुमशक्तस्तु षट्सु मासेषु वाचरेत् ॥

वैशाखेमाघमासेतुचातुर्मास्येतथैवच॥२८॥तत्राप्यदशक्तःकुर्वीतकार्त्तिकस्नानमादरात्॥रवे
रुदयमारभ्यघटिकानांचतुष्टयं॥२९॥तीर्थादिदेवताःसर्वाति—प्यनुत्तयाहरे॥तावन्तगछंतांपुं
सांशापंदत्वासुदारुणं॥३०॥अपुत्रपरावश्चैवलोकेभवतुनिंदिताः॥इतिगछंतितेदेवाब्रह्मेंद्राद्यास्व
मालयं॥३१॥तस्मात्स्नानंप्रकर्तव्यंप्रातर्भानौतुलास्थिते॥अत्यंतमलिनःकायोनवद्वारसमन्वितः॥
३२॥स्रवत्येवदिवारात्रौप्रातःस्नानेनशुध्यति॥तीर्थमादौनमस्कृत्यसंकल्प्यतदनंतरं॥३३॥विष्णवा
दिदेवताभ्यश्चदद्यादर्घ्यंक्रमेणतु॥कार्त्तिकेहंकरिष्यामिप्रातःस्नानंजनार्दन॥३४॥प्रीत्यर्थंतवदेवे
शदामोदरमयासह॥अनेनकार्त्तिकेमासिस्नातस्यविधिवन्मम॥३५॥गृहाणार्घ्यंमयादत्तंदनुजेंद्रनि
षूदनं॥३६॥नित्यनैमित्तिकेकर्मकार्त्तिकेपापनाशने॥गृहाणार्घ्यंमयादत्तंराधयासहितोभवान्॥३७॥
इमान्मंत्रान्समुच्चार्यमौनीस्नायाद्व्रतीनरः॥एवंप्रतिदिनंकुर्याद्दामान्यंतुयथाविधिः॥सर्वपापवि

३

निर्मुक्तो याति विष्णोः परं पदं ॥३६॥ संपूर्णमासाशक्तस्तु स्नानं कुर्याद्दिनत्रये ॥ एकादशे दिने वा
पि द्वादशी दिन एव वा ॥३७॥ अथवा पौर्णमास्यां तु नान्यथा मुक्तिमाप्नुयात् ॥ नान्यथा मुक्तिमा
प्नुयात् ॥ स्नानाशक्तस्तु कुर्वीत परस्यापि प्रबोधनं ॥३८॥ तावन्मात्रेण सर्वाघमुक्तो हरेः पदं ॥ सर्व
विप्रादयो वर्णा आश्रमा यतिपूर्वकाः ॥३९॥ प्रातःस्नानेन शुध्यंति कार्त्तिके तु विशेषतः ॥ कार्त्तिकस्ना
नमात्रेण ब्रह्महत्यादिकान्यपि ॥४०॥ पापानि विलयं यांति भुक्तिं मुक्तिं च विंदति ॥ अत्रैव वर्णयिष्या
मि इतिहासं पुरातनं ॥४१॥ श्रुतमात्रेण येनैव मुच्यते सर्वकिल्बिषैः ॥ पुरा राजा बलिर्नाम शूद्रो भू
द्गजसाह्वये ॥४२॥ अतीव धनसंपन्नः शौर्यौदार्यगुणान्वितः ॥ तस्य पुत्रास्त्रयो जाताः सर्वधर्मब
हिष्कृताः ॥४३॥ महाकापोतिकाख्यश्च दुष्कापश्चेति संज्ञिताः ॥ पितरि प्रस्थिते स्वर्गते पुत्रा लोभमानसाः
॥४४॥ पितुर्धनं विभज्याथ वुभुजुस्ते यथेष्टतः ॥ माता चंद्रवती नाम पुत्राणां गृहमावसत् ॥४५॥ भार्यास

३

(8)

कास्तुतेपापामातृद्वेषपरायणाः॥नाहारंसंप्रयच्छंतिकुद्धंवभरणेरताः॥४६॥मातरंनंदयंतिस्म
ताडयंत्यतिगर्विताः॥मातृद्वेषेणतेषांतुनसंततिरजायत॥४७॥मातासातीवदुःखार्त्तामहारण्य
मुपागता॥व्याघ्रस्तांभक्षयामासद्विजनेतत्रनारद॥४८॥मातृहत्यादिदोषेणनष्टद्रविणसंपदः॥
व्याधधर्ममुपाश्रित्यमार्गगानप्यपीडयत्॥४९॥तेषांभीत्यातुमार्गोपिजनभ्रष्टोयदाभवत्॥तदा
रण्यमृगान्हत्वात्योपजीवनमाचरत्॥५०॥तदाग्नांभोनिपातेनतेषांमृत्युरजायत॥दुर्गतिंप्राप्य
तेतत्रपिशाचत्वमुपागतः॥५१॥तत्रैवशरयतीरेकंटकद्रुममाश्रिताः॥छायानलभ्यतेतेषांज
लंहंसंनिपायते॥५२॥हंसफलंवामलंवातत्सापःपीडवद्भवेत्॥क्षुधापिबाधतेतेषांनाहारोल
भ्यतेक्वचित्॥५३॥तदासीत्मुद्गलोनामकार्तिकस्नानतत्परः॥शरयूमज्जनंकृत्वाकंटकद्रुमतो
गमत्॥५४॥तदादैवयोगेनचार्द्रवस्त्रोदबिंदवः॥अपतंनुपरिक्षात्तुपिशाचानांहतांहसा॥५५॥त

४ दार्द्रबिंदुपातेनजातिस्मृतिरजायत॥अहोब्राह्मणपाहीतिचुक्रुशुस्तेपुनःपुनः॥५६॥तान्दृष्ट्वा
विस्मितोभस्ताकेयूयमितिचाब्रवीत्॥माभैष्टयुष्मेमोक्षिष्येब्रूततत्रनांतमंजसा॥५७॥इत्युक्तास्त
इमंप्रोचुर्वयंचात्रवलेसुताः॥महाकायोविकायश्चदुष्कायश्चेतिसंज्ञिताः॥५८॥मातृद्वेषेणमह
तानिःसंततमुपागताः॥धनहानिमनुप्राप्यव्याधवृत्तिमुपागताः॥५९॥वनेवज्रनिपातेनमृत्युर
स्मानपद्यत॥पैशाच्यंयोनिमासाद्यतिष्ठामोगतदीक्षया॥६०॥जातिस्मृतिरभून्नोद्यद्यपापास्मा
द्रू॰ न्समुद्धर॥इतिप्रोक्तःपिशाचैःसचिंतयामासमोक्षणं॥६१॥नदेवकार्त्तिकस्नानंसस्मारैषांविमो
क्षणं॥दिनत्रयकृतंस्नानंपुण्यंतेभ्योददौमुनिः॥६२॥तत्क्षणाद्देवतामुक्तादिव्यरूपधराबभुः॥६२॥
दिव्यपीतांबरधरादिव्याभरणभूषिताः॥दिव्यंविमानमारुह्यमुनेःकृत्वाप्रदक्षिणं॥६३॥नमस्का
रंतथाकृत्वाप्रययुस्तेत्रिविष्टपं॥एवंकार्त्तिकमासस्यस्नानजंधर्मसंचयं॥६४॥कोवावर्णयितुंश ४

कोलेशमात्रमुद्धृतं ॥ श्रोतुमिच्छसि यच्चान्यं तद्वक्ष्ये तव नारद ॥६५॥ इति श्रीसारोद्धारे कार्तिक
माहात्म्ये प्रथमोध्यायः ॥१॥ ॥छ॥ ॥छ॥ ब्रह्मोवाच ॥ कार्तिकस्य तु मासस्य त्रिंशत्तिथिषु दे
वताः ॥ संप्रवक्ष्यामि देवर्षे समाहितमनाः शृणु ॥१॥ केशवाद्या रमेशस्य चतुर्विंशतिमूर्तयः ॥ वासु
देवादिकाः पंच मत्स्यो वा दशायणः ॥२॥ प्रतिपत्तिथिपर्वासु पौर्णिमांतासु नारद ॥ त्रिंशन्मूर्तय एतास्त
पूज्याः प्रोक्ता मनीषिभिः ॥३॥ दामोदरस्त्वेतदासां लक्ष्म्या सह जगासते ॥ संपूर्णे कार्तिके मासि पूजये पो
तिनि भक्तितः ॥४॥ दामोदरं समुद्दिश्य स्नानपूजादिकाः क्रियाः ॥ कृत्वा दानं प्रयत्नेभ्यो नित्यं कुर्यात्प्र
यत्नतः ॥५॥ दानं विना कृतं कर्म निष्फलं नात्र संशयः ॥ तस्माद्दानं प्रकर्तव्यं प्रयत्नेन मनीषिभिः ॥६॥
न दानसदृशं किंचित्त्रिषु लोकेषु विद्यते ॥ कार्तिके मासि यद्दत्तं तदनंतफलं भवेत् ॥७॥ पत्रं पुष्पं फ
लं तोयं शाकं गुडमधोदधिः ॥ लवणं तंदुलं चान्यद्दद्याद्यत्नेन भक्तितः ॥८॥ प्रतिपत्तिथिमारभ्य त्रिंशत्ति

९

श्रा॰
५

पिष्टुपत्नतः॥ दातव्यं च विशेषेण वक्ष्यामि शृणु नारद॥९॥ सार्पं नवनीतं तु देयं प्रतिपदीरितं॥ द्वि-
तीयायां तिथौ देयं पायसं क्षीरसंयुतं॥१०॥ तृतीयायां दधि प्रोक्तं चतुर्थ्यां वस्त्रमुच्यते॥ पंचम्यामपो-
वस्त्रं तु षष्ठ्यां कौशेयवस्त्रकं॥११॥ सप्तम्यां देयमाज्यं स्यादष्टम्यां सगुडास्तिलाः॥ नवम्यां तंडुला देया
गोधूमा दशमीदिने॥१२॥ गोदीचंदनसुक्तं हि देयमेकादशीदिने॥ द्वादश्यां कांस्यपात्रं स्याद्दातव्यं क्षी-
रपूरितं॥१३॥ त्रयोदश्यां मधुप्रोक्तं देयं शार्करपासुतं॥ चतुर्दश्यां मुद्गचूर्णेतां दद्याद्द्विजायते॥१४॥
आमावास्यां च वृषोत्सर्गं कुर्यादुद्दिश्य वै पितॄन्॥ घृतपूर्णं रौप्यपात्रं देयं प्रतिपदि स्मृतं॥१५॥ अन्नसु-
क्तं भाजपात्रं द्वितीयायामुदाहृतं॥ चणकास्तृतीयायां चतुर्थ्यां मसुरा मताः॥१६॥ खर्जुरा अपि पंच-
म्यां सगुडा आढकाः स्मृताः॥ कुजवारो यदि भवेत्समुद्दारिद्रनाशनः॥१७॥ षष्ठ्यां गुडं देयं स्यात्सप्तम्यां
चंदनं स्मृतं॥ कर्पूरं देयमष्टम्यां केतकीकुसुमान्वितं॥१८॥ दद्यात्कुंकुमपुष्पं तु द्विजाय नवमीदिने॥ दा

५

⑩

लि ग्रामं द्विजेंद्राय गोरोच द्वादशीदिने ॥ दद्याद्धुंदां त्रयोदश्यां चतुर्दश्यां तु मौक्तिकं ॥ २० ॥ माणिक्यादी
नि रत्नानि कार्त्तिक्यां प्रतिशेत्नरः ॥ एवं क्रमेण दातव्यं त्रिंशत्तिथिषु नारद ॥ २१ ॥ अन्यच्च कार्त्तिके मासि
दानमावश्यकं ध्रुवे ॥ सुवर्णपात्रे संपूर्णे पायसं सघृतं तथा ॥ २२ ॥ साप पंचसतांबूलं दक्षिणासहितं तथा
॥ सक्षीरं शर्करायुक्तं पंचरत्नसमन्वितं ॥ २३ ॥ सफलं च प्रदातव्यं द्विजेंद्राय कुटुंबिने ॥ दरिद्रः कांस्यपात्रे तु
स्थापयित्वा प्रयछतु ॥ २४ ॥ शक्त्या च दक्षिणां दद्यादन्यथा न सुखं भवेत् ॥ न संततिश्च तस्य स्यान्न सुखं ना
पि संपदः ॥ २५ ॥ यो न दद्याद्द्विजेंद्राय भक्त्या पायसमंजसा ॥ पुरा शक्रादयो देवाः ऋषिभिश्च समन्विताः ॥ २६ ॥
हरिं वै शरणं जग्मुर्भक्त्या नम्रशिरोधराः ॥ तुष्टुवुस्ते हृषीकेशं मत्स्यं पुरुषोत्तमं ॥ २७ ॥ देवदेव जगन्नाथ
त्वं हि त्राता शरणागतान् ॥ पाहि नस्तावकान्सर्वान्देहि मोक्षं सुदुर्लभं ॥ २८ ॥ श्रीविष्णुरुवाच ॥ यूयं वै कार्त्ति
के मासि तुलासंक्रमणे रवौ ॥ यदि स्नानं प्रकुर्वीत तदा वो संततिर्दृढा ॥ २९ ॥ माघे तु रथसप्तम्यां कूष्मांडस्य

प्रदानतः॥ यत्फलं समवाप्नोति तुलासंस्थे दिवाकरे॥३०॥ तस्मादनंतगुणितं परमान्नप्रदानतः॥ फलं
सुमहदाप्नोति नात्र कार्या विचारणा॥३१॥ इत्युक्त्वा विष्णुरेतेषां तत्रैवांतरधीयत॥ ततस्तस्यातिमापे
हल्लोके धर्मसनातनः॥३२॥ नानेन सदृशो धर्मो त्रिषु लोकेषु विद्यते॥ तस्मात्पायसदानं तु सर्वलोकत्र
रास्यते॥३३॥ अत्र ते कथयिष्यामि इतिहासं पुरातनं॥ राजासौवीरदेशे तु धर्मसत्वेभिदः पुरा॥३४॥ तेने
दं सर्वेयज्ञैस्तु चरितं सर्वपूर्तकैः॥ सर्वाणि तेन दानानि कृतानि हरिभक्तितः॥३५॥ गोदानं स्वर्णदानं
च रौप्यदानं तथैव च॥ तिलदानं वस्त्रदानं अन्नदानं तथैव च॥३६॥ न कृतं कार्त्तिके मासि प्रदानं पायस
स्य तु॥ तेन राजा गतः स्वर्गं अन्नेन परिवर्जितः॥३७॥ अतिक्षुधा [redacted] बाधितस्य नाहारो लभ्यते क्वचि
त्॥ खंडयित्वा स्वमांसानि खादन्क्लिश्यन्नहर्निशं॥३८॥ देवेंद्रं परिपप्रच्छ नान्नं मे लभ्यते कुतः॥ इंद्रः प्रो
वाच राजानं क्लेशेन महतान्वितं॥३९॥ त्वया न कार्त्तिके मासि विप्रवर्योपपायसं॥ प्रदत्तं तेन नाहारो लभ्य

तेतवभूमिप॥४०॥इदानींतवपुत्रस्तुभुविसाम्राज्यमश्नुते॥त्वत्सुत्रेणचतेनाहंदापयिष्यामिपायसं
॥४१॥लप्स्यतेतेनतेषान्नंस्वर्गलोकेवराट्स्वयं॥हृतंसंप्रेषयामासतत्सुत्रायमहात्मने॥४२॥श्रुत्वासद्
तवाक्यंमुदितस्तुहृष्टमानितः॥कृत्वापायसदानंचभुक्त्वाभोगाननेकशः॥४३॥पुत्रेराज्यंनिधायाथ
ययौविष्णोःपरंपदं॥तस्मात्पायसदानंतुकार्त्तिकेमासिशस्यते॥४४॥ब्रह्मोवाच॥तथाकार्त्तिकमासे
तुअन्नदानंविशिष्यते॥अन्नेनजायतेलोकअन्नेनैवाभिवर्द्धते॥४५॥अन्नंहिसर्वभूतानांप्राणभूतंप
रंविदुः॥नीयेनान्नेनकिंतस्यदेवपात्रादिनापिकिं॥४६॥सर्वंसंपद्यतेब्रह्मन्नन्नदानान्नसंशयः॥इतिहा
संप्रवक्ष्यामिअन्नदानस्यपुण्यकं॥४७॥पुरासीत्सत्यमित्रामतीर्थयात्रापरःसदा॥पितव्यातीर्थमात्रंतु
सकृतंतेनभक्तितः॥४८॥एकदामतिमाधन्वजान्हवींस्नातुमादरात्॥पुरींविशालांसंप्राप्यस्नात्वाप
रिपीडितः॥४९॥ग्रामेस्मिन्केनदातास्तिजनान्पप्रच्छसंविशत्॥जनाःप्रोचुःसस्येत्तुमपतद्गृहमागतः॥

७

५०॥ सत्यकेतुश्च तं दृष्ट्वा संपूज्याप्यब्रवीद्द्विजं॥ स्वागतं ते द्विजश्रेष्ठ किं करोमीति सादरं॥५१॥ तवेहाग
मनाद्द्विप्र सफलं जन्म मे भवत्॥ तृप्तिं मे पितरोप्यातास्त्वप्रसादस्यालितोद्गतात्॥५२॥ देवाश्च सकलाः प्री
ता यतो देवमयो द्विजः॥ मद्य दिष्टतमं भोज्यं भोजनं तत्कुरु प्रभो॥५३॥ सत्यजिदुवाच॥ न तुष्टोहं तव वाक्ये
न स्वागतेनासतेन च॥ न त्वया सदृशो लोके गृहस्थो विद्यते भुवि॥५४॥ सर्वेषामाश्रमाणां तु गृहस्थो
योनिरुच्यते॥ यथा वा पक्षिणो वृक्षमाश्रयंति दिनात्यये॥५५॥ तथाश्रयंति भक्ता निक्षुधिता निगृहा
धिपं॥ सर्वे तुष्टिमयंते दानं गंगायात्राहस्नानवा॥५६॥ सत्यकेतुरुवाच॥ अद्यापि न मया दृष्टा द्विज गंगा स
रिद्वरा॥ अगतातिथिभोज्यार्थं कुर्वतो नावकाशतः॥५७॥ अतो भागीरथीस्नानं नास्ति मे द्विजसत्तम॥ स
त्यजिदुवाच॥ एतावंतं त्वया स्तोत्रं पापिना सोमयाकृतं॥५८॥ येन त्वया हि न स्नातं गंगायां पापचेतसा॥ तद्गृ
हेहं न भक्ष्यामि सत्कृतोपाविपर्ययो॥५९॥ गंगां प्रति जगामाशु सत्यकेतुर्विनिंदमन्॥ ततः स सत्यजितो गंगां ७

चक्षुर्बोतर्हिं ताभवत्॥१०॥ सोपि संभ्रांतचित्तस्तु किमेतदिति चिंतयन्॥ अवगाहितुमारब्धो नापश्यम
दुदकं नदा॥११॥ अयमभातीम्पीस्तुता नाममंत्रपदैर्द्विजः॥ गंगामूर्तिमयीभूत्वा प्रोवाच द्विजपुंगवं॥
१२॥ सत्यकेतो गृहं गच्छ तं प्रसाद्याभिवादनैः॥ अन्नं भुक्त्वा तु तद्गेहे पुनरागच्छ सुव्रत॥१३॥ अन्नं ददा
ति यो विप्रो कार्त्तिके केशवप्रिये॥ तस्मादस्य गृहे मा कांक्षे अहं लोकान्पुनंत्यपि॥१४॥ किं पुनस्त्वादृशा ब्रह्म
न्स्माकं वं प्रसादय॥ इति तस्या वचः श्रुत्वा गतवांस्तस्य चाश्रमं॥१५॥ सत्यकेतुं नमस्कृत्य स्ववृत्तांतं निवे
दयत॥ आत्मानं निंदयामास भूयो भयोपि तस्तवन्॥१६॥ सत्यकेतुश्चतं दृष्ट्वा पप्रावस्वजमे द्विजं॥ भोजया
मास धर्मज्ञो यथेष्टं प्रीतिपूर्वकं॥१७॥ सोपि भुक्त्वा ययौ गंगामनुज्ञातो द्विजन्मना॥ गंगां प्रवाहरूपां च दृष्ट्वा
स्नानं चकार ह॥१८॥ तस्मान्नारद माहात्म्यमन्नदानस्य को विदेत॥१९॥ इति श्रीसारोद्धारे कार्त्तिकमाहात्म्ये अ
न्नदानमहिमावर्णनं नाम द्वितीयोध्यायः॥२॥ ॥छ॥ छ॥ ब्रह्मोवाच॥ कार्त्तिके मासि देयानि दानानि सु

15

का० ८

निसत्तम ॥ समासात्कथ्यमानानि श्टणुष्व गदसत्तम ॥ १ ॥ गोपीचंदनदानं तु श्रोत्रियाय ददाति यः ॥ सर्व
पापविनिर्मुक्तो वैष्णवतमवाप्नुयात् ॥ २ ॥ गोदान[illegible]भदानं च कार्त्तिके यः शुभे दिने ॥ इह सौख्यमवाप्नोति
नात्र कार्या विचारणा ॥ ३ ॥ कदलीफलदानं तु तांबूलस्य विशेषतः ॥ अन्नदानं शाकदानं शालग्रामशिलां तथा
॥ ४ ॥ हेमदानं व्यतीपाते वस्त्रदानं घृतं पयः ॥ ये कुर्वंति नराः धन्या ते गच्छंति हरेः पदं ॥ ५ ॥ दीपारात्रिकां पयो दध्या
रामान्नं घृतसंयुतं ॥ स तु पुण्यमवाप्नोति शतब्राह्मणभोजने ॥ ६ ॥ कमलैः पूजयेद्यस्तु कार्त्तिके कमलाप्रि
यं ॥ सर्वैश्वर्यमवाप्नोति शतब्राह्मणभोजनैर्नात्र कार्या विचारणा ॥ ७ ॥ कार्त्तिके तुलसीपत्रं गंधं तुलसिकाष्ठजं
॥ यो ददाति हरेर्भक्त्या याति विष्णोः परं पदं ॥ ८ ॥ शोभंति केतकीपुष्पैर्योर्चयेत्कार्त्तिके हरिः ॥ पूजितो जन्मसाहस्रं
नात्र कार्या विचारणा ॥ ९ ॥ शंखदानं तु यः कुर्यात्प्राप्य चक्रांकितस्य च ॥ तस्य पापानि नश्यंति भुक्तिं मुक्तिं च विंद
ति ॥ १० ॥ गीतापाठं तु यः कुर्यात्कार्त्तिके विष्णुवल्लभे ॥ तस्य पुण्यफलं वक्तुं नालं वर्षशतैरपि ॥ ११ ॥ एकादश्यां नि

८

राहारमुपवासं करोति यः॥ पूर्वजन्मकृतात्पापान्मुच्यते नात्र संशयः॥१२॥ शालग्रामस्य नैवेद्यं यो
भुंक्ते मुनिसत्तम॥ अंनदोषाश्च नश्यंति नात्र कार्यविचारणा॥१३॥ भुक्त्वा केशवनैवेद्यं कोटियज्ञफ
लं लभेत्॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत्॥१४॥ पूजाकाले तु देवस्य घंटानादं करोति यः॥
हरेस्तांपि परां याति मनुजे नात्र संशयः॥ दरान्नं वर्जयेद्यस्तु कार्तिके कृष्णतुष्टये॥१५॥ अध्वगं सुदरि
श्रांतं कालेन गृहमागतं॥ यो तिथिं पूजयेद्भक्त्या स हरेश्च प्रियो मतः॥१६॥ निंदां कुर्वंति ये मूढा वैष्णवा
नां महात्मनां॥ पतंति पितृभिः सार्द्धं महारौरवसंज्ञके॥१७॥ दृष्ट्वा भागवतान्विप्रान्सन्मुखं यो न याति च
॥ न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीं॥१८॥ निंदां भगवतः शृण्वन्तत्परस्य जनस्य च॥ महापापी
स विज्ञेयो रौरवे नरके पच्येत्॥१९॥ प्रदक्षिणं तु यः कुर्यात्कार्तिके केशवस्य च॥ पदे पदेश्वमेधस्य फलं प्राप्नो
यसंशयः॥२०॥ प्रणामं दंडवत्कुर्यात्कार्तिके केशवस्य हि॥ अश्वमेधसहस्रस्य फलं प्राप्नोस्य संशयः॥२१॥

कुर्द्युं च भोजनं चैव कार्त्तिके भक्तिसंयुतः ॥ कारयेद्धि प्रशादेन तस्य पुण्यमनंतकं ॥२२॥ तुलसीमृत्ति
कापुंड्रं ललाटे यस्य दृश्यते ॥ यमस्तं नेक्षितं शक्तः किमुद्भूता भयंकरः ॥२३॥ कन्यादानं तु यः कुर्यात्का
र्त्तिके माधवप्रिये ॥ तस्य पुण्यस्य माहात्म्यं नालं वक्तुं चतुर्मुखः ॥२४॥ धात्रीफलगते दीपे यैर्निशि तु पतियो
हरिं ॥ द्वादश्यां पौर्णिमास्यां वा विष्णुलोकं स गच्छति ॥२५॥ सार्थं वा लवणं वापि यद्दिहिं दिव्यस्य शाकितः ॥ त
द्देयं कार्त्तिके मासि प्रीत्यर्थं शार्ङ्गधन्विनः ॥२६॥ इत्यादिबहुवो धर्मो कार्त्तिके विष्णुवल्लभे ॥ यथाशक्त्या प्र
कुर्वीत श्रीविष्णुप्रीतये मुने ॥२७॥ विष्णुपूजादिकं सर्वं कुर्याद्धि भक्तिपूर्वकं ॥ भक्त्या विरहितो यस्तु सुवर्णादि
भिरर्चयेत् ॥२८॥ तस्य पूजां न गृह्णाति देवदेवो रमापतिः ॥ सर्वेषां कर्मणामादौ भक्तिरेव विशिष्यते ॥२९॥
भक्त्या विरचितं कर्म विष्णोः प्रीतिकरं परं ॥ भक्त्या विरहितं कर्म न विष्णोः प्रीतिपूर्वकं ॥ अत्र ते वर्णयिष्यामी
इतिहासं पुरातनं ॥३०॥ कांति पुर्यां पुरा चोळश्चक्रवर्तिनृपो भवत् ॥ यस्याह्वयेन ते देशाश्चोळा इति च विश्रु

ता ॥ ३१ ॥ यस्याप्यनेकमल्लस्य ताम्रपर्णीतटावुभौ ॥ सुवर्णपद्मरत्नेभाढ्यावास्तांतत्र महामते ॥ ३२ ॥ क
दाचित्सगमद्राजा अनंतशयने हरिं ॥ तत्र श्रीरमणं देवं मुक्तारत्नैः प्रपूजयेत ॥ ३३ ॥ पूजयित्वा प्रणम्या
थ उपविष्टस्तत्र वै ॥ तावद्ब्राह्मणमायातमपश्यद्देवसंनिधौ ॥ ३४ ॥ स्वपुरवासिनं तत्र विष्णुदासाह्व
यं द्विजं ॥ विष्णुसूक्तेन संस्नाप्य संपूज्य तुलसीदलैः ॥ ३५ ॥ तुलसीपूजयान्तस्य राज्ञः पूजां पुरा कृतां ॥ आ
च्छादितां समालोक्य राजा वचनमब्रवीत् ॥ ३६ ॥ चोळ उवाच ॥ माणिक्यस्वर्णरूपाढ्यारत्नपूजा मया कृता ॥
विष्णुदास कथं सेयं तुलस्याच्छादिता त्वया ॥ ३७ ॥ विष्णुभक्तिं न जानासि वराकोसि मतो मम ॥ इति राज्ञो व
चः श्रुत्वा स क्रोधाद्द्विजसत्तम ॥ ३८ ॥ राज्ञो गौरवमुल्लंघ्य जगाम वचनं तदा ॥ विष्णुदास उ० ॥ विष्णुभक्ति
न जानासि ज्ञानदुर्बलभो विभो ॥ ३९ ॥ गर्वितोसि श्रिया राजन् न वैष्णवं न विद्यते ॥ इति तद्वचनं श्रुत्वा सह
स्यन्नृपसत्तम ॥ ४० ॥ विष्णुदासं तदा गर्वादुवाच वचनं मुने ॥ राजोवाच ॥ इत्थं चेद्दृढसे विप्र विष्णुभक्त्या

१९

१० तिगर्वितः ॥४१॥ भक्तिस्ते विष्णुपती विप्र दारिद्रस्याधनस्य च ॥ यज्ञादिकं त्वया चैव न कृतं विष्णुतुष्टिदं
॥४२॥ नापि देवालयं पूर्वं कृतं विप्र त्वया शुभं ॥ रे हरास्यापि तो[illegible]ा वै विष्णुभक्तो दुरात्मनः ॥४३॥ तद्रू
पं तु द्विजश्रेष्ठाक्वो मे यस्तु निश्चितं ॥ साक्षात्कारं हरेरादौ चैवाद्यमं गमिष्यति ॥४४॥ मया चाराध्यो स
त्रैः पश्यध्वं द्विजपुंगवाः ॥ इत्युक्त्वासन्नृपो गात्वा निजं राजगृहं द्विज ॥४५॥ आरेभे वैष्णवं सत्रं कृपाचार्यं तु मु
द्गलं ॥ ऋषिसंघसमायुक्तं बहुन्नं बहुदक्षिणं ॥४६॥ विष्णुदासोपि तत्रैव तस्थौ देवालये व्रती ॥ उपचा
रैः षोडशाभिर्गीतनृत्यादिमंगलैः ॥४७॥ एवं चरा विष्णुदासस्तकालसा नित्यविधिं द्विज ॥ पाकं कृत्वा तु सं
न्यस्य पादे वस्याग्रेति भक्तिमान ॥४८॥ उपहारार्पणं कर्त्तुं तान कृष्णोप्यहरेच्चतं ॥ विष्णुदासस्योपवासो जा
तस्तस्मिन्दिने द्विज ॥४९॥ द्वितीये निपुनस्तद्व साकं कृत्वा विधानतः ॥ उपहारार्पणं कर्तुं तावत्केनाप्यहरेच्च
तं ॥५०॥ एवं नित्यं हरेदन्नं महद्रूपः कोपि पूरुषः ॥ ततः सो विस्मयः सोय मनस्येवं विचारयत ॥५१॥ अहो १०

२०

नित्यं सममभ्येत्य को वान्नं हरतं मम ॥ श्वेक्सं त्वामिनत्स्नानं नत्वाज्यैम म सर्वथा ॥५२॥ आनिवेद्य ह
रेरन्नं दुर्मासस दृष्ट्वा मतं ॥ उपोषितो हं सत्यानं स्नातुं आर्कचं कथं मया ॥५३॥ अद्य पत्नीं करिष्यामि पा
कान्नहरणास्य वै ॥ एवं निश्चित्य विप्रर्षिः स्वहारार्पणं पदं ॥५४॥ तावद्दृष्टो चांडालं पाकान्नहरणे स्थि
तं ॥ क्षुत्क्षामांगहीनवदनं आर्तिच मोक्षो वितं ॥५५॥ तमालोक्य द्विजाग्र्यो भूत्क्रूदयारिक्तमानसः ॥ वि
लोक्यान्नाहरं विप्रस्ति स्थितिवेसधावत ॥५६॥ स्वस्त्रमन्नं न भोतव्यं धृतमेतत्गृहाण भो ॥ इत्युक्त्वा तं स
तं विप्रं पश्चाधावंतं विलोक्य च ॥५७॥ वेगाद्धावन्नततो भीत्या मूर्छितः सपपात ह ॥ भीतं संमूर्छितं दृष्ट्वा
चांडालं स दृष्टो न मः ॥५८॥ श्री प्रभागत्य हरूप मानिजं वस्त्रेण वीजयत ॥ अथोत्थितं तमेवासौ विस्मृदा
सो विलोकयत ॥५९॥ साक्षान्नारायणं देवं शंखचक्रगदाधरं ॥ पीतांबरं चतुर्बाहुं श्रीवत्सांकं किरीटिनं ॥
६०॥ तं दृष्ट्वा सात्विके भावैरावृतो द्विजसत्तमः ॥ स्तोतुं व्यापि नमस्कर्तुं तदा नालं बभूव सः ॥६१॥ आलिंग्य

२१

प्रहरिर्विप्रस्य साहाय्यं तदा ददौ ॥ जगामाशु स्वानुवर्तं अंके स्थाप्य द्विजोत्तमं ॥६२॥ अपराऽंबरे पश्य
द्विमानस्थं द्विजोत्तमं ॥ वैकुंठभुवनं यांतं विष्णुना सह विस्मिताः ॥६३॥ स्वगृहं सुहृल्लवेगाद्धा कुर्यात्संमनःपो
भवेत् ॥ यस्त्विद्रूपामपाच्यैवं य इदं हस्तादिकं कृतं ॥६४॥ स एष तु विष्णुना सार्धं याति वैकुंठमंदिरं ॥६॥ सिते

न मया सम्यक् स्वयेस्मिं वैष्णवे कृते ॥६५॥ हुतमग्नौ हुता विप्राह मायैः पूर्णमानसा ॥ नैवाद्यापि समे देवः
प्रसन्नो जायते ध्रुवं ॥६६॥ भक्त्यैव तस्य विप्रस्य साक्षात्कारं गतो हरिः ॥ तस्माद्दानश्च यज्ञैश्च नैव विष्णुः प्र
सीदति ॥६७॥ भक्तिरेव परं तस्य निदानं दर्शने विभोः ॥ इत्युक्त्वा भागिनेयं स्वं अभ्यषिंचन्नृपासने ॥६८॥ आ
बाल्यादि दीक्षितो यज्ञेष्वपुत्रश्च गतो भवत् ॥ तस्मादेतच्छ्रोतृदेवो सदा राज्यांशुभाभागिनः ॥६९॥ स्वस्त्रिया एव
जायंते तेन राज्ञा हतो विधिः ॥ यज्ञवाटं ततोभ्येसङ्घैर्वाचं ततो वदत् ॥६॥ विष्णो भक्तिं स्थिरां देहि मनोवाक्
कायकर्मभिः ॥ इत्युक्त्वा सोपतद्वह्नौ सर्वेषामेव पश्यतां ॥७०॥ मुकुंदस्सुतदा क्रोधाज्जहामुसाल्पयत्नतः ॥ ता

वसाविरभूद्विष्णुःकुंडाग्रेभक्तवत्सलः॥७०॥समालिंग्यतुतंप्रेम्णाविमानेस्थाप्यतंपुनः॥तस्यदत्वासमारूप्यं
वैकुंठमानयद्धरिः॥७१॥योविष्णुदासोसतुपुण्यशीलोयश्चोलभूपःससुशीलनामा॥एतावुभौनसमरूप
भाजौहास्यभौतौतेनरमाप्रियेण॥७२॥तस्माद्भक्त्यासमंकिंचिन्नास्तिवैमोक्षसाधनं॥तुष्टिमाप्नोतिभक्त्यै
वविष्णुर्नान्येनकेनचित्॥७३॥श्रीस्कांदेकार्तिकमा॰ब्रह्मनारदसंवादेचोलोपाख्यानेतृतीयोध्यायः॥३॥ ॥७३॥
नारदउ॥कार्तिकेदीपदानस्यमाहात्म्यंचतुरानन॥वक्तव्यंरूपयामह्यंश्रोतुंकौतूहलंहिमे॥१॥[redacted]॥का
र्तिकेदीपदानस्यमाहात्म्यंचतुरानन॥वक्तव्यंरूपयामह्यंश्रोतुंकौतूहलंहिमे॥१॥ब्रह्मोवाच॥यस्तुदेवालये
विष्णोःकुरुतेदीपमालिकां॥अथवाब्राह्मणगृहेतुलसीनांपुरोपवा॥२॥स्वगृहेपुरतोविष्णोःकुरुतेदीपमालिकां
॥[redacted]देवस्यापितस्फलंपुत्रंसमाहितमनाःशृणु॥३॥प्रज्ञामायुःश्रियंधैर्यंधर्मश्रद्धांबलंपरा॥
शांतिसत्यंचवारस्यंदीपंतस्यभवंतिहि॥४॥वैष्णवेजलदानात्तुयथातुष्टिर्हरेर्भवः॥कार्तिकेदीपदानेनतथातु

हिनसंशयः॥५॥ विक्रीहंगो घृतं तत्र तदभावे तु माहिषं॥ आज्यं वा तदभावे तु घृतं ग्राह्यं तु नारद॥६॥ घृताभा
वे तु तैलेन दीपो देयो हरेः प्रियः॥ सौवर्णं राजतं वापि तांम्रं पीतलमेव वा॥७॥ मन्मयं वापि पात्रं स्याद्दीपदाने
तु नारद॥ कार्पासी वा रदशां तत्र दशां वा वसनस्य च॥ नारी दपदाने वर्तिकार्थे कल्पयेत्तु सुबुद्धिमान्॥ विंशो वर्षः
प्रदातव्या प्रकाराः स्याभिनिहन्यते॥९॥ यथा पाद यथा प्रकाराः स्यात् तथा पादस्य संक्षयः॥ तथा तथा हि पुण्यस्य
वृद्धिः स्यान्नात्र संशयः॥१०॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ शूद्रः कश्चित्तु देववर्षे प्राणिहिंसापराय
णः॥११॥ नास्तिको निर्दयः क्रूरो निष्ठुरः सर्वदुष्कृतः॥ जठरार्थं प्रयत्नस्तु तेनाकः विविधः कृतः॥१२॥ गोच्छाग
वाजिमहिषा विक्रीतास्तेन हिंसके॥ विक्रयो दासदासीनां अपत्यानां तथा कृतः॥१३॥ धान्यानां वसनानां च
काष्ठानां कर्मणां तथा॥ गृहाणां विक्रयश्चैव पादुकोपानहस्तथा॥१४॥ कुसीदं तु कृतं तेन शूद्रवृत्तिस्तथा वृता॥
सेवावृत्तिः कृता तेन जठरार्थं हि नारद॥१५॥ तथापि नोदरे पूर्णे चौर्यवृत्तिरुपाश्रिता॥ तेनापि नोदरं पूर्णं ततो व्याधो

वभूवह ॥१६॥ वनेमृगाः पक्षिणश्च हतास्तेनैवपापिना ॥ तेनाप्यधर्मेण नश्चिवृक्षस्यपादेगम्नोहत ॥१७॥ स
वैष्याक्षुदरायत्तौ क्षुधयापीडितोभवत् ॥ क्षुधानिवृत्तिकेनस्यादित्युक्ताहिनरोदह ॥१८॥ तदातस्यैवभार्यासि
तस्यदुःखस्यनाशिनी ॥ पतिव्रतामहाभागा भर्त्स्यमानाप्यनिष्ठुरा ॥१९॥ तद्वाक्यादपिसर्वेषुविकर्मसुसदो
द्यता ॥ नैष्ठुर्यादसहायस्यत्याजितस्यचबांधवैः ॥२०॥ एकाकिनःसहायासीद्द्वितीयासापतिव्रता ॥ तेनसंत्य
ज्यमानापिनतंतत्याजकर्हिचित ॥२१॥ ताड्यमानापिवामोत्कृष्टानेवाभवत्क्वचित ॥ पतिशुश्रूषयानित्यंका
लंनिन्यपतिव्रता ॥२२॥ अविद्योवासुविद्योवासधनोनिर्धनोथवा ॥ अंधोवापंगुरथवाषंढोवानिष्ठुरोपिवा ॥
२३॥ पवित्रोवाऽपवित्रोवास्त्रीभिःसेव्यःपतिःसदा ॥ यातुनारीपतिंत्यक्त्वासाचिरंनरकंवसेत् ॥२४॥ इतिमंत्रोपदि
ष्टासाजहौनैवंपतिःसती ॥ ततोदुःखाभिसंतप्तोरुदंतंपरिमंजसा ॥२५॥ विमृज्यतस्यनेत्रेतुतासामधुरया
गिरा ॥ रोदनंकुरुखेदस्मात्सुखोसिमहामते ॥२६॥ अयत्नेनान्यत्रकर्तव्योमास्त्रीवद्रोदनंकुरु ॥ मन्नाथमात्रमा

१३ दुःखंकुर्मोःकमललोचन॥२७॥चिंतनंकुरुलक्ष्मीशपादपद्मस्यसर्वदा॥तेनस्यात्तवसौख्यंहिइहलोके
परत्रच॥२८॥अपत्कालेमनोविष्णुद्रौपद्याकुलविश्रुतः॥गजेंद्रेणापिसंध्यातोदेवःसेंद्रैश्चसर्वदा॥२९
अपहृमोक्षणंतेषांकृतवानहरिरीश्वरः॥त्वमप्यद्यममस्वामिनतत्स्मरणंसेवनंकुरू॥३०॥हरेश्चहरिभक्तानां
स्वस्तितेस्यान्नसंशयः॥यस्यानुकूलोगोविंदोतस्यस्यादक्षयंधनं॥३१॥विमुखोयस्यगोविंदस्तस्यस्या
दुःखमक्षयं॥अनुकूलंयदादैवंसर्वंसाध्यंभवेत्ततः॥३२॥प्रतिकूलंयदादैवंसाधितंचविनश्यति॥येनय
यत्कृतंकर्मसुकृतंवाथदुष्कृतं॥३३॥यस्मिन्कस्मिन्स्थितश्चापिजंतुस्तत्फलमश्नुते॥विश्रुतंत्वमपापू
र्वभाजितंयन्मनीषिभिः॥३४॥दृष्ट्वातांम्लानवदनंतदिहस्मृतिमागतं॥पूर्वकर्मार्जितफलंदैवमेवरहानित्य
तु॥३५॥तामेवदेवतांभर्तःप्रार्थयावःसुखामये॥एहिभद्रमहाभागमद्वाक्यंयदिरोच्यते॥३६॥देवताप्रा
र्थनाद्देवसर्वैश्वर्यंप्रवर्द्धते॥इत्युक्त्वासागुणवतीकरेधृत्वास्वयंपतिं॥३७॥उत्थापयामासततःपतिंशो १३

विष्णुंलोकान्निरामनंश्री॥नृसिंहाकृतिंतदा॥३९

देवालयंसमानीयपर्वदेपतिनासह॥३८॥ [redacted]

काकुलंतदा॥प्रल्हादोरक्षितोयेनदैत्यश्च्यादिनिपातितः॥३९॥तस्मिन्देवालयेदृष्ट्वामूर्त्तिमंशांसितव्र
ताः॥तपस्विनश्चदेवस्यपूजकाराजपालिताः॥४०॥अन्नेराड्डारदेनैश्चैवपुराणकथ्यतास्तथा॥तान्दृष्ट्वा
तीवसंहृष्टाभर्त्तारंवाक्यमब्रवीत॥४१॥अत्रैवधर्मशालायांवासःकार्यस्त्वयाप्रभो॥देवस्यब्राह्मणानांच
सेवाकार्यात्वयाविभो॥४२॥ब्राह्मणासेवयातुष्टादेवेनप्रेरितास्तथा॥पद्ययेष्टमन्नदास्यंतिसाध्वोदीनव
त्सला॥४३॥नारदोपिपुरापूर्वंहिश्रद्धीपुत्रोबभूवह॥तेनापिब्राह्मणानांहिकृतासेवानिरंतरं॥४४॥ब्राह्मणा
नांप्रसादेनदेवर्षित्वमगात्किल॥तथापित्वंभुक्तिंमुक्तिंश्चभविष्यतिनसंशयः॥४५॥सेवातुष्टाद्विजानांहिप्रसा
दास्त्रापावल्लभ॥एवंपत्न्याबोधितस्तुसभद्रस्तुष्टमानसः॥४६॥चकारतत्रवसतिंभार्ययासहनारद॥देवसे
वांचकारासौविप्रसेवांतथैवच॥४७॥वासुदेवालयेनित्यंमार्जनंकृतमानसे॥तथैवाभ्युक्षणंचैवतुलसी
वनपालनं॥४८॥पत्न्यानपात्प्यदेवर्षेनिजवृत्यातुसेवया॥ततोगोविंदशुश्रूषाविप्रसेवातथैवच॥४९॥अभि

दृष्टिं गता पुत्रदं दंपत्योरुभयोरपि ॥ ब्राह्मणास्तस्तु संहृष्टास्तयोश्चक्रे दयां मुहुः ॥५०॥ शिष्टमन्नं ददुः सर्वे त
योः प्रीत्या दिने दिने ॥ ततोदरस्य वैचिंगास्य क्रमेणसर्वथा ॥५१॥ अहंन्यहनि सा भार्यांतासर्यसमजायत ॥ दे
वालये कदाचित्तु निशीथे तैलवर्जितः ॥५२॥ तत्र सदीपो देवस्य तदा भार्या सुतेन हि ॥ निजभोजनतैलेन पुनः
प्रज्वालितः किल ॥५३॥ कार्तिके मासि दैवर्षे चीरेण वदशा कृता ॥ तत्क्रियागुणमानीत्ववह्निमानीयभक्तितः
॥५४॥ पुनर्दीपो यथापावत्तु कृतो देवस्य संनिधौ ॥ तेन पुण्यप्रभावेन विमानं तत्र चागतं ॥५५॥ रविप्रकाशसंका
शमप्सरोगणमंडितं ॥ दिव्यहंससमासाद्य भार्यया सह शूद्रकः ॥५६॥ विमानमधिरुह्यासौ जगाम त्रिदि
वं तदा ॥ ब्रह्मोवाच ॥ दीपदाने वराक्केन परदीपस्य बोधनं ॥५७॥ कर्तव्यं तेन तस्यास्ति दीपदानफलं तथा ॥
अत्राप्युदाहरंतीममितिहासं पुरातनं ॥५८॥ काश्चिद्द्विदर्भतनया काशीदेशपतेः प्रिया ॥ दीपदानस्य माहात्म्यं
सपत्नीनामुवाच ह ॥५९॥ परदीपप्रबोधस्य तत्त्वोवाच सा सती ॥ भो भो सपत्न्यः शृणुत कौतुकं दीपदान

जं॥६०॥यन्मयाविष्णुभवने श्रीप्रदत्ते दीपमालिका॥जन्मांतरेषु गंगायास्तीरे कार्त्तिकमासे तु॥६१॥देवा
लये कदाचित्तु दीपस्नेहविवर्जितः॥आसीन्निर्वाणभूयिष्ठो देवस्य पुरतो निशि॥६२॥देवस्यायतने चो
हं अभवं तत्र मूषिका॥प्रदीपवर्त्तिहरणे कृतबुद्धिर्वरानना॥६३॥गृहीता च मया वर्त्ती दीपेन च समन्वि
ता॥प्रजज्वाल - पूर्ववर्त्ति देवस्य पुरतो क्षणं॥६४॥तेन मे ईदृशी कांतिः संजाता च वरानना॥राजकन्या त्व
मा पत्नी राजपत्नीत्वमेव च॥६५॥तव जातिस्मृतित्वं च तस्माद्दीपान्ददाम्यहं॥इत्युक्तास्ताः सपत्न्यास्तु परि
घज्येदमब्रुवन्॥६६॥तत्प्रसादादयं सर्वैः कृतार्थो नात्र संशयः॥अहोभाग्य॥नीयमानो मूषिकया प्रदी
पः प्रबोधितः॥६७॥अज्ञानलक्षणमात्रं हि देवस्य पुरतो निशि॥तेनेदृशं फलं जातं किं पुनर्बुद्धिपूर्वकं॥६८॥प्र
बोधनं प्रदीपानां परेषां विहितं यदि॥फलं स्याद्दीपदानस्य स्वर्गो मोक्षस्तथैव च॥६९॥तस्माद्दीपाः प्रदात
व्याः सर्वकामार्थसिद्धये॥कार्त्तिके तु विशेषेण दीपदानप्रभावतः॥७०॥लक्ष्मीः स्थिरापि भवति पीडाहानिश्च

जायते॥७१॥ इतिश्री कार्तिकमा॰ दीपमाहिमावर्णनंनाम चतुर्थोध्यायः॥४॥ ॥श्री॥ ब्रह्मोवाच॥ आका
शदीपंयोदद्यात्कार्तिकेमासिनारद॥ महतींश्रियमाप्नोतिरूपसौभाग्यसंपदः॥१॥ नारदउ०॥ आकाश
दीपमाहात्म्यंश्रोतुमिच्छामिनारद॥ केनवादौपुराचीर्णं नद्वदस्वममप्रभो॥२॥ ब्रह्मोवाच॥ संप्राप्तेकार्तिके
मासिप्रातःस्नानपरायणः॥ आकाशदीपंयोदद्यात्तस्यपुण्यंवदाम्यहं॥३॥ पुरातुनिष्ठुरोनामलुब्धकोलो
कसंकरः॥ यमुनातीरवासीचकालमत्सरिवापरः॥४॥ पापिकान्बाधतेनित्यंचोरवृत्त्याधनुर्धरः॥ किंचिद्वि
मजगामासौचौर्यार्थंकार्तिकेमुने॥५॥ तस्मिन्विदर्भनगरेराजासुकृतिनामकः॥ चंद्रशर्माख्याविप्र
स्यवचनात्कार्तिकेसुधीः॥६॥ चकारव्योमदीपंचहरिमंदिरमस्तके॥ दीपंदत्वामहाभक्त्यासश्रृणोच्चकथा
मिमां॥७॥ एतस्मिन्नेवकालेतुचौर्यार्थंसमुपागतः॥ राजादत्तंव्योमदीपंप्रेक्ष्यतत्क्षणमनीषया॥८॥ तद्दानीं
दैवयोगेनगृध्रोजवसमान्वितः॥ सदीपंतैलपात्रंतुमुखेधृत्वापतत्खगः॥९॥ द्रुमाश्रितेतापिबतैलंदीपं

संरक्षाप्य पक्षिराट्॥ वृक्षाग्रतु समास्थाय क्षणमात्रमतिष्ठतः॥१०॥ तदानींदैवयोगेन मार्जारो वृक्ष
मारुहत्॥ गृहीतुं पक्षिणं वेगात्स्वर्णंदीपमकम्पत॥११॥ आकाशादीपमाहात्म्यं कथितं चंद्रशर्मणा॥ श
ह्रैसुकर्णनाम्नेच तैर्वैश्रुश्रवणक्षणं॥१२॥ एवगमार्जारकौ तत्र पश्चात्संचल्यदीक्षतः॥ मार्जारोऽजगरहे
तव्यशार्वांतरगतं खगं॥१३॥ दैवेनचोदितौ वृक्षाच्छिलायां पतितौ तदा॥ नष्टगात्रौ मृतौ तत्र दिव्यदेहौ ब
भूवतुः॥१४॥ विमानवरमारूढौ जग्मतुर्विष्णुमंदिरं॥ तत्सर्वं लुब्धको दृष्ट्वा चैर्मार्थ्ये समुपागतः॥१५॥ नि
वृत्तोदुष्टभावेन तत्सर्वमवदद्द्विजं॥ पश्चाद्दुषा च तं विप्रं मुने कौ खपक्षिणौ॥१६॥ इति लुब्धवचः श्रुत्वा चं
द्रशर्माब्रवीद्वचं॥ शृणु लुब्ध प्रवक्ष्यामि तयोर्वृत्तांतमंजसा॥१७॥ मार्जारोयं पुराविप्रो देवशर्मेति विश्रु
तः॥ अलेवलनृसिंहस्य पूजको पुष्टमानसः॥१८॥ तस्मिन्देवालये प्रासे तैलद्रव्यादिकं तदा॥ अप
हृत्यपतेनैव कुटुंबं पोषयत्यसौ॥१९॥ आयुर्नीतैवमेवासौ ततः पंचत्वमागतः॥ तस्मात्सापाकालात्

स्त्रे महारौरवरौरवे ॥२०॥ निरुच्छ्वासततं प्राप्य असीपत्रवनं क्रमात् ॥ छिद्यमानो महाकायैर्यमदू-
तैर्भयंकरैः ॥२१॥ अनुभुक्त्वा तान्सर्वान्घोरांस्समतां गतः ॥ ततस्तुश्वालयोनौ च चांडालोभूत्कुकर्मि-
भिः ॥२२॥ एवं जन्मशतं प्राप्य भूत्वै मार्जारतां गतः ॥ आकार्तादीपमाहात्म्यं श्रुत्वेदानीं तु दैवतः ॥२३॥ निर्मु-
क्तोखिलपापस्तु जगाम हरिमंदिरं ॥ गश्रोपंच पुरा विप्रो मैथिलो वेदपारगः ॥२४॥ शार्यालिरिति विख्या-
तो दासीसंगं सदाकरोत् ॥ तेन दोषेण महता पंचत्वमगमत्तदा ॥२५॥ नरके यातनां भुक्त्वा पश्चात्क्रमोत्व-
गोत्वकं ॥ दैवेनच्योदितो ह्यत्र तैलपानार्थमागतः ॥२६॥ इहासावाकार्तादीपं तु श्रुत्वान्येव हरेः कथां ॥ विध्व-
स्ताखिलपापस्तु जगाम हरिमंदिरं ॥२७॥ इत्येतत्सर्वमाख्यातं लुब्धगाथ यथा सुखं ॥ व्याधोप्यस्य नचः
श्रुत्वा गतश्चैव स्वमंदिरं ॥२८॥ व्रतं चाकार्तादीपस्या चकार विधिवन्मुने ॥ आपुः शेषं तदानीं प्राजगा-
म हरिमंदिरं ॥२९॥ सोपि राजा सुरूप्याख्यो महाश्चर्यसमन्वितः ॥ चकार विधिवन्मासं चंद्रशर्मो क्रमागतः ॥

॥३०॥ प्रातः प्रातः शुचिर्भूत्वा कार्त्तिके मासि वैनप॥ दामोदराय विश्वाय विश्वरूपधराय च॥३१॥ नम
स्कृत्वा प्रदास्यामि व्योम्निदीपं हरिप्रियं॥ गोविंददामोदर वासुदेव ब्रह्मादिदेवस्य निदानमूर्त्तेः॥३२॥ आ
काशवत्सर्वेगतो व्यपास्तनरांता भवं त्वाशु समस्तदोषा॥ निर्विघ्नं कुरु देवेश यावन्मासः समाप्यते ३३
व्रतेनानेन गोविंद त्वयि भक्तिः प्रवर्धतां॥ इति मंत्रेण राजासौ दीपदानं चकार ह॥३४॥ ब्राह्मे मुहूर्ते चोत्था
य व्योम्नि दीपं ददाति हि॥ एवं कार्त्तिकमासस्य व्रतं राजा चकार ह॥३५॥ उत्सर्गस्य विधिं कृत्वा व्योमदीपं स
माप्य च॥ सपत्नीकान्द्विजान्भोज्यामिष्टान्नैर्हरितुष्टये॥३६॥ तेन पुण्यप्रभावेन पुत्रपौत्रसमन्वितः॥ इह
भुक्त्वा परं सौख्यं अंते विष्णुपदं ययौ॥३७॥ तस्मात्कार्त्तिकमासेस्मिन्नराः स्वपति व्योमदीपकं॥ न यच्छंति ते सो—
पुरीं गच्छंति च हरेः पदं॥३८॥ इति श्री सारोद्धारे कार्त्तिकमा० व्योम्निदीपप्रकारो नाम पंचमोध्यायः॥५॥ ॥८
ब्रह्मोवाच॥ तुलस्याः शृणु माहात्म्यं पापघ्नं पुण्यवर्धनं॥ यत्सुरा विष्णुना प्रोक्तं रमायै तद्वदाम्यहं॥१॥ संप्रा

२८ येकार्त्तिकेमासितुलस्यापूजनंहरेः॥येकुर्वंतिनराधंन्यातेयांतिपरमांगतिं॥२॥तस्मात्सर्वप्रयत्नेनतुल
स्याःकोमलैर्दलैः॥पूजनीयोमहाभक्त्यासर्वक्लेशविनाशकः॥३॥रोपितातुलसीयावत्कुरुतेमूलविस्तरं॥
तावद्युगसहस्राणिस्वर्गलोकेमहीयते॥४॥तुलसीपत्रसंयुक्तोजलस्नानंचरेद्यदि॥सर्वपापविनिमु
क्तोमोदतेविष्णुमंदिरे॥५॥वृंदावनंयःकुरुतेरोपणार्थंमहामुने॥तावतैवविनिर्मुक्तोब्रह्महत्यादकल्प
ते॥६॥तुलसीकाननंयत्रगृहेयस्यावतिष्ठति॥तद्गृहंतीर्थभूतंतुनोयांतियमकिंकराः॥७॥सर्वपापहरं
पुण्यंकामदंतुलसीवनं॥रोपयंतिनराःश्रेष्ठास्तेनपश्यंतिभास्करिं॥८॥तुलसीकाष्ठसंयुक्तंगंधयोधा
रयेन्नरः॥तद्देहंनस्पृशेत्सापंक्रियमाणंतपेक्ष्वा॥९॥तुलसीविपिनछायायत्रचैवभवेद्द्विजः॥तत्रश्राद्धं
प्रकर्तव्यंपितॄणांतृप्तिहेतवे॥१०॥यन्मुखेतुलसीपत्रंकर्णेशिरसिदृश्यते॥यमस्तल्लक्षितुंशक्तःकिमुदू
ताभयंकराः॥११॥यादृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरोगाणामभिवंदितानिरसनीसिक्ता २८

३५

नकत्र्यासिनी ॥ प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणेपि मुक्तिफलदा तस्यै
तुलस्यै नमः ॥ १२ ॥ यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः ॥ यदग्रे सर्ववेदाश्च तुलसी तां नमाम्यहं ॥ १३ ॥
तुलसीमाहिमानं यः शृणुयांनियमाहृतः ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ १४ ॥ अत्रैवोदाहरंती
ममितिहासं पुरातनं ॥ तुलस्याविषये ब्रह्मन्श्रवणात्पापनाशनं ॥ १५ ॥ पुरा काश्मीरदेशे तु ब्राह्मणो संब
भूवतुः ॥ हरिमेधसुमेधाख्यौ विष्णुभक्तिपरायणौ ॥ १६ ॥ सदावित्तौ द्विजवरौ तीर्थयात्रापरायणौ ॥ गच्छं
तौ वै कदाचिद्गौ कांतारे श्रमविह्वलौ ॥ १७ ॥ तुलसीकाननं तत्र ददृशातुरारिंदमौ ॥ तयोर्मध्ये सुमेधाख्यो दृ
ष्टातत्तुलसीवनं ॥ १८ ॥ प्रदक्षिणां तदाकृत्वा ववंदे भक्तिसंयुतः ॥ हृष्टैतद्धरिमेधस्त उवाच परमं सुहृ ॥ १९ ॥
हरिमेध उ० ॥ आतपे बाधतेह्यावां गत्वास्मिन्वटपादपे ॥ तत्रछायां समाश्रित्याहं वस्यामि तमार्दितं ॥ २० ॥
एवमुक्त्वा सुमेधस्तु हरिमेधेन संयुतः ॥ वटं जगाम धर्मज्ञो महाकोटरसंयुतः ॥ २१ ॥ तत्रोपविश्य छायायां ह

१८

रिमेधसुवाचह॥ श्रूयतांविप्रनाहेनतुलस्याश्चोत्तमांकृपां॥२३॥ परमेशप्रसादेनसंजातायाःपयोनि
धेः॥ पुरादुर्वाससःशापान्नष्टैश्वर्येपुरंदरे॥२४॥ ममंथुःक्षीरजलधींद्राद्याश्चासुरासुराः॥ ऐरावतःकल्प
तरुश्चंद्रमाकमलातथा॥२५॥ हरितक्यादयश्चापिदिव्याश्चौषधयस्तथा॥ ततःपीयूषकलशमनुरामर
दायकं॥२६॥ कराभ्यांकलशंविष्णुर्धारयन्सकिलंपरं॥ अवेक्ष्यमनसासद्यःपरांनिर्वृतिमापरां॥२७॥ तस्मि
न्पीयूषकलशेआनंदाश्रुबिंदवः॥ अपतंस्तुलसीसद्यःसमभूत्परमंगला॥२८॥ ततोसृष्टांतथाल
क्ष्मींतुलसींप्रददौहरिः॥ तुलसीमंकमारोप्यप्रसन्नवदनोहरिः॥२९॥ पुनीहिलोकानखिलानितितस्यैवरं
ददौ॥ नारायणस्यतुलसीतस्मादतिप्रियतरामता॥३०॥ ततस्तस्यानमस्कारोमयाविप्रकृतोधुना॥ इत्येवं
वदतस्तस्यवटवृक्षात्तदापतत्॥३१॥ सवृक्षकोटरात्तस्मात्पुरुषौद्वौविनिर्गतौ॥ द्योतयंतौदिशःसर्वास्तेज
सासूर्यसंनिभौ॥३२॥ हरिमेधसुमेधौत्वूचतुर्विस्मयान्वितौ॥ हरिमेधसुमेधउवाच॥ कौयुवांदेवसंका

१८

30

श्रो भवंतौ सर्वमंगलैः ॥ यस्त्वं भवतोर्जातं कथयेन दद्द तां प्रभो ॥ ३३ ॥ इत्युक्तौ ब्राह्मणाभ्यां तौ हृष्टतुर्बहि
निर्गतौ ॥ युवामेव पिता माता चाथ पोष्यितभ्या गुरुः ॥ ३४ ॥ ज्येष्ठ उवाच ॥ अहं सुदेवलोकस्थो आस्तिकोना
मतो मतः ॥ अप्सरोगणसंवीतः कदाचिन्नंदनं वनं ॥ ३५ ॥ क्रीडार्थमागतो भद्रो विषयासक्तमानसः ॥ रेमि
रे देववनिता यथाकामं मया सह ॥ ३६ ॥ मुक्ता मल्लीकमाल्यानि निपेतुः क्रीडतो मम ॥ संजपन्द्रोमशा पुरस्ता
द्दृष्ट्वा कुपितो मुनिः ॥ ३७ ॥ योषितां नापराधोयं पारसंवैपरतंत्रता ॥ अयमेव दुराचारः शापार्ह इति चाब्रवीत्
॥ ३८ ॥ त्वं ब्रह्मराक्षसो भूत्वा वटवृक्षे चरेति मां ॥ प्रसादितो मया चोऽथ विशापं मयि दत्तवान् ॥ ३९ ॥ तुलसीवि
ष्णुमाहात्म्यं सर्वपापहरं शुभं ॥ यदा श्रोष्यसि सद्यस्त्वं तदा मुक्तिमवाप्स्यसि ॥ ४० ॥ इति शापस्तु मुनिना वि
रकालं सुदुःखितः ॥ वसाम्यत्र वटे देशाज्ज्ञातं संदर्शनं युवां ॥ ४१ ॥ मुक्तिर्जाता विप्रशापाद्द्वितीयस्य कथां शृ
वै ॥ अयं मुनिवरः पूर्वं गुरुशुश्रूषणे रतः ॥ ४२ ॥ गुरोराज्ञामनादृत्य ब्रह्मराक्षसतां गतः ॥ सुप्रसादादधु

१९ नाग्रुन्सुगा पादिमोन्वितः ॥ ४३ ॥ तीर्थयात्राफलंचैवयुवाभ्यामिहसाधितं ॥ इत्युक्तौतौमुनिवरौ प्रणम्य
चपुनःपुनः ॥ ४४ ॥ तावनुज्ञाप्यधावस्वंजग्मतुःपरयामुदा ॥ ततस्तौतीर्थयात्रार्थंपरमंमुनिपुंगवौ ॥ ४५ ॥
सेवंतौतुलसींपुण्यांजग्मतुर्मुनिपुंगवौ ॥ तस्मान्नारदमाहात्म्यंतुलस्याःकोनुवर्णयेत ॥ ४६ ॥ तस्मात्कार्तिक
मासेस्मिन्तुलसींपूजयेन्मुने ॥ इतिहासमिदंपुण्यंसर्वपापप्रणाशनं ॥ ४७ ॥ यःशृणोतिसदाभक्त्यासर्वपा
पैःप्रमुच्यते ॥ ४८ ॥ इतिश्रीसारोद्धारेकार्तिकमाहात्म्येतुलसीमहिमावर्णनंनामषष्टोध्यायः ॥ ६ ॥ ॥ छ ॥ ॥
ब्रह्मोवाच ॥ सर्वेषामेवधर्माणांगुरुःपूज्योपरंतपः ॥ गुरुशुश्रूषयाविप्रसर्वंप्राप्नोतिमानवः ॥ १ ॥ गुरौतुष्टेचतु
ष्टास्युर्देवाःसर्वेसवासवाः ॥ कार्तिकेमासिसंप्राप्तेहृवाक्मौपितरस्त्वाः ॥ २ ॥ अकृत्वागुरुशुश्रूषांनरकानेवविं
दति ॥ गुरुप्रसादात्सर्वंतुप्राप्नोत्येवनसंशयः ॥ ३ ॥ अत्रैतेवर्णयिष्यामिइतिहासंपुरातनं ॥ पुराभागीरथीती
रेविप्रोभूज्जैतमाभिधः ॥ ४ ॥ तस्यशिष्यामहात्मानस्त्रयःस्वाध्यायतत्पराः ॥ मेधावीकपिलश्चैववसुमतिश्च १९

महातपाः॥५॥ सर्वे ते संयतात्मानो गुरुभक्ता मनस्विनः॥ एकदा गौतमः शिष्यानित्युवाच महात्मनः॥६॥ गत्वा वनमितः शीघ्रं मेध्यांसि च फलानि च॥ समित्कुशांश्च मूलानि समानयत सुव्रताः॥७॥ शिष्यास्ते चोदितास्तेन गुरुवाक्याद्वनं ययुः॥ ततः सर्वं समादाय मध्याह्ने स्वाश्रमं ययुः॥८॥ मत्वा स्वल्पमिदं सर्वं गुरुरुष्टोऽब्रवीच्च तान्॥ पुनर्गत्वा वनं भद्रा बहून्यादाय सत्वरं॥९॥ समागच्छत दुर्वृत्ता यदि जीवितुमिच्छथ॥ तच्छ्रुत्वेति ततो भीताश्च वनं गुरुभाषितं॥१०॥ क्षुत्क्षामकण्ठास्तृषिताः पुनरेव वनं ययुः॥ तत्र दृष्ट्वा जलं रम्यं स्नानं चक्रुः पपुः पयः॥११॥ पश्चाद्वनं प्रविविशुर्मृगराक्षससेवितं॥ तदानीमेव रात्रिश्च जाता लोकभयंकरी॥१२॥ व्याघ्रराक्षसशब्दांश्च शुश्रुवुर्भयशंकिताः॥ ऊचुः परस्परं दुःखं वयं पापास्त्वाश्रमातुराः॥१३॥ तमसावृते वने घोरे न जानीमो दिशास्तथा॥ न पश्यामो फलानीह न पुष्पं न कुशादिकं॥१४॥ किं गृहीत्वा तु गुरवे वेदयामः सुनिर्वृताः॥ इतस्ततः प्रधावंति राक्षसा भीमदर्शनाः॥१५॥ वयं यदि गतास्तर्हि गुरुः शापं प्रदास्यति॥ यदि गृहं न गच्छामो भयात्तस्य महात्मनः॥

॥१६॥ कारुण्यात्स महद्दुःखं प्राप्नुयात्सह भार्यया॥ अत्रस्था राक्षसैर्भुक्ता गच्छामो निरयं तदा॥१७॥ अहो क
ष्टमहो कष्टमस्माकं समुपस्थितं॥ येनोपायेन मुक्ताः स्मः स उपायः कथं भवेत्॥१८॥ एवं भयातुराः सर्वे निर्ग
तास्तेथ तद्वनात्॥ इतस्ततो भ्रमंतश्च महाकूपेस्वते पतन्॥१९॥ कूपस्थविषसर्पैस्ते दंशिता मूर्छतांप्रपुः॥ अ
यतान्नागतान्शिष्यान् गौतमश्चिंतयान्वितः॥२०॥ नागतास्ते कथं शिष्याः किं वा व्याघ्रैश्च भक्षिताः॥ धिङ्मां
कृपणमत्युग्रमदयालुं सुनिष्ठुरं॥२१॥ येन ते सु महात्मानो मया प्रस्थापिता पुनः॥ पितृस्नेहेन गुरुत्वेन बंधुत्वे
न च बालकाः॥२२॥ मामेव शरणं यातास्तान्विहाय कथं वसेत्॥ एवं चिंतयतस्तस्य रात्रिशेषो गतस्तदा॥२३॥
प्रातर्जगाम विपिनं सभार्यो मृगयंश्च तान्॥ तेषां नामानि संगृह्य समाहूय ह्यनेकशः॥२४॥ प्रत्युत्तरमलब्धः
सन्प्रविष्टो गहनं पुनः॥ तत्रापश्यत्तदा कूपे मृतास्तान्सर्पदंशितान्॥२५॥ सरोद भार्यया साकं गौतमस्तप
सां निधिः॥ तं दृष्ट्वा सर्पपतयः पंचसप्तफणान्विताः॥२६॥ उद्गिरंतो विषं घोरं समुत्तस्थुर्भयंकराः॥ विप्रसपी

ननाहस्यशिष्यजीवनयत्नवान्॥२७॥ तदानेफणिनःप्रोचुःकिंतेशिष्यैर्गतासुभिः॥ अस्मद्द्विजाग्निदग्धानां
पुनरुज्जीवनंकुतः॥२८॥ इत्युक्तेतेषांवचःश्रुत्वातानुवाचततोमुनिः॥ गौतमोवाच॥ किमर्थमेनेसंदष्टासुभा
भिर्नोपराधिनः॥२९॥ सर्पाऊचुः॥ वयंनिमित्तमात्रास्मायमेनैवहिमारिताः॥ इतिश्रुत्वावचस्तेषांयमंवा
ह्वुमथारभत्॥३०॥ तद्दृष्ट्वापन्नोभीतश्चागतोविप्रसंनिधौ॥ उवाचवचनंनम्रोकंपदेहोद्विजोत्तमं॥३१॥
अकालमरणंतेषांविप्रेंद्रसमुपस्थितं॥ कालएवमहाबुद्धेनात्रकार्याविचारणा॥३२॥ जहानेहिध्रुवोमृत्युर्मृ
तानांजननंध्रुवं॥ ममापराधःस्वल्पोवानात्रगौतमविद्यते॥३३॥ कर्मणास्वकृतेनेहजायतेहन्यतेपुनः॥ त
त्साधारणोहेतुर्भगवान्पुरुषोत्तमः॥३४॥ तस्यैवमहिमानंत्वंज्ञात्वागंतुमिहार्हसि॥ गौतमउ०॥ किंयस्नाने
नमेदेवजीवितेनत्वकिंमम॥३५॥ शिष्यैरेतैर्विमुक्तस्यममापिमरणंवरं॥ यन्मयाचरितंतत्सद्दानयज्ञव्रतादि
कं॥३६॥ तेनपुण्येनमेशिष्यास्त्वत्प्रसादेनवायम॥ जीवनंप्राप्नुवंतेतेधर्मराजस्तथाकुरु॥३७॥ ब्रह्मोवाच॥ श्रुता

वैयस्चतौ वाक्यं गौतमस्य महात्मनः ॥ शापभीतो वरं प्रादात् येन जीवंति ते द्विजाः ॥३८॥ ततस्ते सहसोत्थाय
संतुष्टाश्च परस्परं ॥ दृष्ट्वाग्रतो गुरुं पश्चाद्यमं चैव ववंदिरे ॥३९॥ तानाह गौतमः प्रीस्याहृदमालिंग्य सादरं ॥
सर्वान्वेदांश्च शास्त्राणि समस्तांगानि सुव्रताः ॥४०॥ इतिहासपुराणानि मत्प्रसादादवास्यथ ॥ गुरुनैवं वरे दत्ते
यमश्चापि वरं ददौ ॥४१॥ सुबुद्धिमत्प्रसादाद्वो भवतानात्र संशयः ॥ इत्युक्त्वा पद्विजं पृष्ट्वा जगाम निलयं यमः ॥
४२॥ गौतमोश्च स भार्यश्च सशिष्यो गृहमागतः ॥ संतोषमतुलं लेभे शिष्यैः सार्धं द्विजोत्तमः ॥४३॥ इह भुक्त्वातु
लं सौख्यं अंतेगाद्विष्णुमंदिरं ॥ तेपि शिष्याः सुखं लब्ध्वाप्ययुरंते हरेः पदं ॥४४॥ एतत्ते कथितं विप्र गुरुपूजाफलं
महत् ॥ तस्मात्सर्वप्रयत्नेन गुरुं सेवेत सर्वदा ॥४५॥ इति सारोद्धारे कार्तिकमा° गुरुपूजामाहात्म्यवर्णनं नाम स
प्तमोध्यायः ॥७॥ ॥ॐ॥ ॥ ब्रह्मोवाच ॥ कार्तिकव्रतिनं पुंसां नियमा ये प्रकीर्तिताः ॥ शृणुष्व तान्कथ्यमानान्म
मानारद सादरं ॥१॥ कार्तिके वर्जयेद्विद्वान्द्विदलं बहुबीजकं ॥ फलानि बहुबीजानि धान्यानि द्विदलानि च ॥२॥

वर्जयेत्कार्त्तिके मासि व्रती विष्णुपरायणः॥ माषमुद्गमसूराश्च चणकाश्च कुलित्थका॥३॥ निष्पावराज
माषाश्च आढका द्विदलं स्मृतं॥ नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत्॥४॥ कार्त्तिके वर्जयेत्तैलं कार्त्ति
के वर्जयेन्मधु॥ कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुष्कसंधितं॥५॥ शुष्कं पर्युषितं प्रोक्तं लवणं शुष्कसंधितं॥ उभ
यं कार्त्तिकत्याज्यं मांसं च परिवर्जयेत्॥६॥ आमीषं वर्जयेदूर्जे पलांडुलसणं तथा॥ प्राण्यंगमामिषं चूर्णे फले
जंबीरमामिषं॥७॥ धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा॥ गोछागोमहिषीदुग्धान्यदुग्धानि चामि
षं॥८॥ द्विजक्रीता रसा सर्वे लवणं भूमिजं तथा॥ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं॥९॥ आत्मार्थं पाचि
तं चान्नं आमिषं तद्बुधैः स्मृतं॥ अलांबु चापि वृंताकं कूष्मांडं बृहतीफलं॥१०॥ भोकरं कंकदिल्वं च वर्जयेत्कार्त्ति
कव्रती॥ उपोदकिं च बिंबं च शिग्रुशाकं तथैव च॥११॥ मूलकं गर्जरं चैव कलिंगं च विवर्जयेत्॥ घृतकोशातकीं
चैव कौसुंभं च विवर्जयेत्॥१२॥ निष्पावान्कुहिरिं चैव वर्जयेच्च प्रयत्नतः॥ तंडुलीकशाकं च पिण्याकं च विव

र्जयेत्॥१३॥ आरनालं पुनः पाकं परपाकं विवर्जयेत्॥ परपाकनिवृत्तश्च परपाकेरतश्च यः॥१४॥ उभौ सु-
रवौ तु विज्ञेयावेतयोः सद्गतिर्भवेत्॥ पाचयेच्छ्रोत्रियस्यान्नं तदभावे जलं पिबेत्॥१५॥ संत्यजेत्सायिनश्चान्नं
जलं चापि विवर्जयेत्॥ व्रीहयो यवगोधूमाः प्रियंगुतिलशालयः॥१६॥ एते हि सात्विकाः प्रोक्ताः स्वर्गमोक्षफल-
प्रदाः॥ एते हि भक्षणीयाश्च कार्त्तिके व्रतिना मुने॥१७॥ ब्रह्मचर्यमधःसुप्तिं पत्रावल्यां च भोजनं॥ चतुर्थका-
ले भुक्तिं च कुर्याद्देवसदाव्रती॥१८॥ स्वयं पत्रावलीं कुर्यात्तु चैर्वा सेवकेन वा॥ शिष्येणाप्यथवा कार्या भार्यया वा
स्नुषयाप्यथवा॥१९॥ दुहित्रा वा भगिन्या वा बंधुना वा स्वमित्रतः॥ क्रमेणाप्य पर्णं पाद्य भुक्तं सर्वं तु तत्र मलतः॥२०॥
भोजनं तत्र कुर्याद्वै स्वाहितं यदिच्छति॥ वेदशास्त्रपुराणज्ञैर्ब्राह्मणैः शंसितव्रतैः॥२१॥ कारयेन्नैव देववर्ष्ये
पत्रावल्यां कदाचन॥ यः करोति द्विजैर्मूढः पत्रावल्यां निरंतरं॥२२॥ रौरवं नरकं याति यावदाभूतसंप्लवं॥ ते
धन्यास्ते सदा रम्या नावमान्याः कदाचन॥२३॥ वेदशास्त्रपुराणज्ञा ब्राह्मणा लोकतारकाः॥ तीर्थानि दर्शयेया

दे वेदास्तन्मुखसंश्रिताः ॥२४॥ सर्वांगान्याश्रिता देवास्तस्मात्सर्व्वो द्विजोत्तमः ॥ यावतीर्वै देवतास्ता इति वेद
वचोपि च ॥२५॥ महिमा दूर्येकं युक्तं द्विजमान्यहमेकस्य ॥ वेदे रामायणे चैव पुराणे भारते तथा ॥ महिमा ब्राह्म
णानां हि सेतिहासः प्रकथ्यते ॥२६॥ भीतः कश्चिद् द्विजेभ्यस्तु राजाप्येवमुवाच ह ॥२७॥ नाहं विप्रांके सुरराजवज्रात्
नभ्यश्च भक्त्या श्वयमास्यदंडात् ॥ नाग्न्यर्कसोमानलवित्तपास्त्रात्तर्वांके भ्यं ब्रह्मकुलावमानात् ॥२८॥ इंद्रो
पि भ्रंशितः स्वर्गान्नहुषश्च नृपाधिपः ॥ पापिनः सर्पयोनित्वमसमर्थे ब्राह्मणैः किल ॥२९॥ यदा हतोपि देवेन गौर
माक्रांतः कदाचन ॥ केनापि द्विजवर्येण तत्क्षांतं हि कृपालुना ॥३०॥ न क्रोधं कृतवानस्मिन् ब्राह्मणे ईश्वरोपि
सन् ॥ इदानीमल्पकालोकाः किंचिदैश्वर्यगर्विताः ॥३१॥ विनापराधं सततं आक्षिपंहि हि द्विजोत्तमान् ॥ ये मखा
ब्राह्मणेभ्यस्तु सेवां गृह्णंति मानवाः ॥३२॥ ब्राह्मणैः कारयित्वा तु पत्रावलीं पुरुषाधमः ॥ भुंक्ते तत्र तु यो मोहात्
नरके पतति ध्रुवं ॥३३॥ कारयित्वा तु पत्रावलीं ब्रह्मणेन विजानता ॥ बलाद्भुंक्ते तु यस्तत्र विष्ठामूत्रेन संशयः ॥

३४॥ निर्मंत्रितो द्विजवरैर्यभ्राली कारयेत्तु यः॥ अन्नदानं कृतं यत्तु तत्सर्वं नि[illegible]लं भवेत्॥३५॥ वेददेवद्विजाती-
नां गुरुगोव्रतिनं तथा॥ स्त्रीराजमहतां निंदां वर्जयेत्कार्तिकव्रती॥३६॥ नरकस्य चतुर्दश्यां तैलाभ्यंगं च कारयेत्॥
अन्यत्र कार्तिकास्नायी तैलस्नानं विवर्जयेत्॥३७॥ रजस्वलांत्यजम्लेच्छपतितव्रात्यकैः सह॥ वेदबाह्यैश्च नवदे
नवसेत्कार्तिकव्रती॥३८॥ धात्रीफलं रविदिने सप्तम्यां च विवर्जयेत्॥ अष्टम्यां वर्जयेच्चापि नारिकेलं व्रती नरः॥३९॥ तां-
बूलं वर्जयेद्यस्तु मासे दामोदरप्रिये॥ तिर्यग्योनिमवाप्नोति नात्र कार्ये विचारणा॥४०॥ कार्तिके मासि रात्र्यास्तु चतु-
र्थ्यां शास्तु यो भवेत्॥ हरिजागरणं तत्र प्रबोधोत्के नकारयेत्॥४१॥ वरं विष्णुव्रतं ह्येतत् न तुल्यं यज्ञसंचयैः॥ यज्ञैस्तु
प्राप्नुयात्स्वर्गं वैकुंठं कार्त्तिकव्रती॥४२॥ भुक्तिमुक्तिप्रदानीह यानि क्षेत्राणि भूतले॥ वसंति तानि तद्देहे कार्तिकव्रत-
चारिणः॥४३॥ दुःस्वप्नं दुष्कृतं किंचिन्मनोवाक्कायकर्मजं॥ कार्तिकव्रतिनं दृष्ट्वा विलयं यांति तत्क्षणात्॥४४॥ कार्ति-
कव्रतिनः पुंसो विष्णुवाक्यात्स्रणोदिता॥ रक्षां कुर्वंति शक्राद्या राजानं किंकरा यथा॥४५॥ विष्णुव्रतकरो नित्यं यत्र ति-

इतिपृष्टकः॥ अहंभक्ताप्रिवाग्न्याचाध्यानैवतिष्ठतितत्रवै॥४६॥ कार्त्तिकव्रतिनः पुण्यंयत्प्रोक्तंस्नानकारिणः॥ नस
मर्थोभवेद्वक्तुंकोपि ब्रह्मांडगोलके॥४७॥ विष्णुप्रियंसकलकल्मषनाशनंतं वसस्तुत्रपौत्रधनधान्यसमृद्धि
कारि॥ ऊर्जव्रतंसनियमंकुरुते मनुष्यः किंतस्यभवलपतीर्थनिषेवणेन॥४८॥ कार्त्तिके मासि विप्रेंद्र नरैर्ये
नियमाकृताः॥ हरिस्मृतिविहीनाश्चन्नपुनंतिकदाचन॥४९॥ नामस्मरणमाहात्म्यमप्यावक्तुंनशक्यते॥ पशु
ता नरकस्थाश्चमुच्यंते किंमुमानवाः॥५०॥ अथतेवर्णयिष्यामि इतिहासंपुरातनं॥ नंदिग्रामेपुराधीमान्पु
ष्करोनामवैद्विजः॥५१॥ नित्यंजपंहरेर्नाम कृष्णमाधवकेशव॥ एतस्मिन्नंतरे ब्रह्मन्यमः प्राहस्वकिंकरा
न्॥५२॥ गच्छध्वंपुष्करगृहं मानयध्वंद्विजोत्तमं॥ तेगत्वातमआनंतोगृहीत्वान्यंपुनर्ययुः॥५३॥ तमायांतंततो
दृष्ट्वाप्रेतपोभीतमानसः॥ प्रत्युत्थायाभिसंगृह्य निवेश्यस्वासनेमुने॥५४॥ भर्त्सयामासस्वान्दूतान्किमे
तदितिदुर्मनाः॥ तत्रान्यःपुष्करोनाम तमस्मत्कंनयाबुधाः॥५५॥ किमर्थंसर्वधर्मज्ञो विष्णुभक्तोविशेषतः॥ मत्स

२४

मीपमिहानीस्यो भवद्भिः पापचेतसैः ॥५६॥ तानेव भर्त्संयित्वासः प्रेतराजस्तमब्रवीत् ॥ गच्छत्वमिति संप्राह
यमं पुष्करनामकः ॥५७॥ पुष्कर उ० ॥ भगवन्नरकान्सर्वान्द्रष्टुमिच्छामि विस्मितः ॥ पापिनो येषु बाध्यंते यात
नागेह संस्थिता ॥५८॥ ततो वैवस्वतोतस्मै निरयान्दर्शयान्बहून् ॥ असीपत्रवनं घोरं तप्तकुंभं भयानकं ॥५९॥
सूचीपूरितजिह्वं च शिस्नछेदकरं तथा ॥ कुंभीपाकं रौरवं च क्रकचं रक्तपूयकं ॥६०॥ इत्यादिषु बहून्दृष्ट्वा पीड्य
मानान्सनारकान् ॥ अदयालुभिरत्युग्रैः पापिभिर्यमकिंकरैः ॥६१॥ कुठारैश्छिद्यमानांतान् हाहाकाररवाकु
लान् ॥ तानाह दुःखितो भूत्वा भवद्भिः किंकृतं पुरा ॥६२॥ नरकस्थास्तदा प्रोचुः स्ववृत्तांतं द्विजोत्तमं ॥ परदार
परद्रव्यसदा हिंसापरायणाः ॥६३॥ परनिंदाकरानित्यंवृत्तिछेदपरायणाः ॥ असाक्षि साक्षिदातारो पंक्तिभेद
करास्तथा ॥६४॥ ब्राह्मणेभ्यः प्रतिश्रुत्य न दत्तं न हुतं तथा ॥ वेदशास्त्रपुराणानां विप्राणां च विनिंदकाः ॥६५
तेन दोषेण पतिता नरकेषु द्विजोत्तम ॥ आत्मपापोपतप्तानामस्माकमकृतात्मनां ॥६६॥ तदंगस्पर्शसं

२५

48

भक्तो वायुरगल्लादयस्यलं ॥ अत्रसंस्थियतांश्च हन्तनक्षणमप्यहनसुखं ॥ ६७ ॥ भविष्यति भवत्स्वर्गो तत्र अ
नस्तां प्रार्थयामहे ॥ तस्मिन्नन्तरे राजा यमः प्राह च पुष्करं ॥ ६८ ॥ गच्छ पुष्कर धर्मज्ञ द्विजानेते प्रयोजनं
॥ पुष्कर उ० ॥ एता हि मुंचयित्वा मे गमनेन सुखं हृदि ॥ ६९ ॥ मय्यासक्तास्त भक्तास्माराधितो हरिरीश्वरः ॥ तेन
पुण्येन सर्वैते सद्यो मुंचंतु नारकाः ॥ ७० ॥ कृष्णाच्युत जगन्नाथ हरे विष्णो जनार्दन ॥ पाहि सर्वानिमानत्र
नरके पात्यनागतान् ॥ ७१ ॥ एवं नामानि ते श्रुत्वा मुक्तास्तु तत्क्षणात्तदा ॥ ऊचुश्च पुष्करं प्रीत्या यतो मुक्ता स्व
यानघ ॥ ७२ ॥ तस्मात्तेकीर्तिरतुला भुवि ख्याता भविष्यति ॥ यमो विस्मयमापन्नः पुष्करं पूज्य चाब्रवी
त् ॥ ७३ ॥ श्रीयम उ० ॥ त्वमेव सर्वल्लोकानां पूज्यः पूज्यतरः स्मृतः ॥ यत्त्वया नारकीयानां नरकादुद्धृतिः कृ
ता ॥ ७४ ॥ स यमेनैवमुक्तस्ततमामंत्र्य भुवं ययौ ॥ पुत्रपौत्रसमायुक्तः परं संतोषमाप्तवान् ॥ ७५ ॥ सो
पि नाम महिम्नैव गतवान्परमं पदं ॥ तस्मात्सर्वप्रयत्नेन कार्तिकव्रततत्परः ॥ ७६ ॥ नामस्मरणमादौ च

कर्तव्यं तेन मुच्यते ॥७७॥ इति श्रीसारोद्धारे कार्त्तिकमाहात्म्ये पुष्करवर्णनं नामाष्टमोऽध्यायः ॥८॥ ॥५॥
ब्रह्मोवाच ॥ कार्त्तिके मासि विप्रेंद्र यस्तु गीतां पठेत्सुधीः ॥ यस्य पुण्यफलं वक्तुं मम शक्तिर्न विद्यते ॥१॥ एकाध्या
यस्य पाठेन सर्वपापक्षयोऽपि सः ॥ मुच्यते मनरस्तस्मात्किमष्टादशपाठतः ॥२॥ अत्र ते वर्णयिष्यामि इतिहासं पु
रातनं ॥ गीतामाहात्म्यविषयं यदुक्तं विष्णुना पुरा ॥३॥ विदर्भे तु जटो नाम द्विजोभूत्कौशिकान्वयः ॥ हित्वा राजोचितं
धर्मं वणिकवृत्त्यां मनो दधे ॥४॥ व्यसनी परदारेषु द्रव्यलक्ष्यैः पिबन्मधु ॥ सुदूरमगमत्सोऽपि वाणिज्यायोत्तरां दि
शं ॥५॥ नानापरिमलद्रव्यं गृहीत्वागमद्गृहं ॥ अपापरस्मिन्नहनि भार्यादर्शनकांक्षया ॥ अत्रांतरे सुतस्तस्य
धर्मशास्त्रार्थकोविदः ॥ पितरं मार्गयामास दिक्षु सर्वासु खिन्नधीः ॥७॥ ततः कदाचिदायातः पित्रा पान्थसहा
गतः ॥ तस्माद्विदितवृत्तांतः शुशोच पितरं बहु ॥८॥ ततो विमृश्य मेधावी चिकीर्षुः पारलौकिकीं ॥ वाराणसीं स
संभारः स गंतुमुपचक्रमे ॥९॥ मार्गे निवासास स्नाहो नीसा तस्मिंस्तरोस्तले ॥ तत्राध्यायं स गीतायास्तृतीयं सज

नापह॥११॥ तस्मिन्नाराक्षसेनापि गीतापाठः कृतोऽभवत्॥ तस्मात्क्षणाद्राक्षसीयोनिं त्यक्त्वा दिव्यवपुर्धरः॥१२॥ वि
मानवरमारुह्य तेजसा भास्करोपमः॥ विस्मितोऽभयपुत्रं च स पुत्रं वाक्यमब्रवीत्॥१३॥ मोचितोऽस्मि त्वया पु
त्र अध्यायपठतांतिके॥ वाराणसीपरं चैतु गंतव्यं त्वयानघ॥१४॥ तत्सर्वं कृत्वा नित्यं च गीतापाठं न संशयः॥ ए
वमुक्तः सुतः प्राह पितरं दीप्ततेजसं॥१५॥ हत्वं मामनुशाधि त्वं कार्यमन्यच्च किंचन॥ ततः प्राह पिता पुत्रं कार्यं मे
ऽस्ति त्वयानघ॥१६॥ अन्ये मद्बंधवो ये वै निरयं प्रतिपेदिरे॥ त्वया मोचयितव्यास्ते इति मेऽस्ति मनोरथः॥१७॥ गीता
पाठं पठं त्वं तु तेभ्यः पुण्यं समुत्सृज॥ तेन तेषां भवेन्मुक्तिरनु भक्तोऽब्रवीन्महां॥१८॥ इत्युक्त्वाजाशिषोरत्वागतवान्
स्वर्गमुत्तमं॥ पुत्रोऽपि गीतापाठस्य पर्वैषां सुकृतं ददौ॥१९॥ तेन तत्सर्वजाः सर्वे मुक्तास्युर्निरयात्क्षणात्॥ दिव्य
रूपाप्युः स्वर्गं गीतापुण्यप्रभावतः॥२०॥ पुनः स पाठपुत्रोसौ गीतापाठमतंद्रितः॥ इह भुक्त्वातुलं सौख्यमंते
मोक्षमवाप च॥२१॥ गीतापाठस्य माहात्म्यं नालं वक्तुं चतुर्मुखः॥ देवाग्रे कार्तिके मासि गीतापाठं करोति यः॥२२॥

57

प्राप्नोतिपरमंसौख्यंमनसायद्यदिछति॥ ब्रह्मउवाच॥ कार्त्तिकेमासिविप्रेंद्रप्रातःस्नानपरायणः॥ २३॥ पु
राणश्रवणंकार्यंदृष्यपापानिरयंव्रजेत्॥ श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवं॥ २४॥ कार्त्तिकेयःपठेन्म
र्त्त्योमुच्यतेपापकोटिभिः॥ श्रावणस्यविधिंसम्यक्वक्ष्यामिश्रृणुनारद॥ २५॥ पुराणस्यतुकथाचकृत्वामंगल
मात्मनः॥ अपाकर्णांतुश्रोतव्योव्यग्रचित्तःशुचिःसदा॥ २६॥ श्रोतासन्मुखमासीनप्रहृष्टश्चापिसमाधि
मान्॥ श्रृणुयाच्चयकर्णादिव्यांपौराणींव्यासनिर्मितां॥ २७॥ मध्येवार्त्तांनकुर्याद्वैकुर्वन्नरकमाप्नुयात्॥ कथा
यांश्रूयमाणायांनकुर्याच्छिशुलालनं॥ २८॥ ममवादान्वदेनैवस्त्रियासंभाषणंतथा॥ नकर्त्तव्यंप्रयत्नेनकथा
विच्छेदकारणात्॥ २९॥ विविधेतुकथायांतुब्रह्महत्यासमंलघं॥ प्राप्नोतिमुनिशार्दूलकथाविच्छेदकःपुमान्॥
३०॥ नकुर्यात्तुकथामध्येतन्यवार्त्तांप्रयत्नतः॥ नारीवापुरुषोवापिकुर्यान्नरकमाप्नुयात्॥ ३१॥ इतिहासंवदाम्यत्र
श्रृणुचैकंहिनारद॥ जनस्थानेपुराकश्चित्ब्राह्मणोवेदशास्त्रवित्॥ ३२॥ धर्मशास्त्रेतिनिपुणःसदाचारपरायणः॥

५२

गं गास्नानविधायादौ कृत्वा संध्यादिकं तथा ॥३३॥ कृत्वा देवार्चनं चैव कर्षणे तत्परोऽभवत् ॥ तस्य भार्यातीव
दुष्टा कर्कशा कलहप्रिया ॥३४॥ असत्यालापनिपुणा पतिद्वेषपरायणा ॥ धान्यादीनां विक्रयं च पति किंचन
तस्करा ॥३५॥ कृत्वा चक्रे धनस्यापि संग्रहं पापनिश्चया ॥ दधिदुग्धं समानीय पचर्शर्करागुडमेव च ॥३६॥ घृतं च न
वनीतं च स्वयमानीय सर्वदा ॥ एकांते भक्षणं चक्रे तदर्थं च क्रमेण गृहे ॥३७॥ दुराग्रहा दुष्टमना पतिनिंदापराय
णा ॥ वह्नीनां पापकर्त्री च परवेश्मोपवेशिनी ॥३८॥ गोष्ठिव्यासंगतो नित्यं कालक्षेपविधायिनी ॥ पतिनिंदेदं प्रकु
र्वाणा सदा निष्ठुरभाषिणी ॥३९॥ अतिथौ द्विजवद्द्वेषकारिणी धर्मनाशिनी ॥ यदा भर्ता पुराणस्य श्रवणार्थं
हि संस्थितः ॥४०॥ प्रत्यहं तत्र गत्वा तु तस्य निंदां चकार सा ॥ संन्यासीव कृपं तेन श्रवणे व्यसनं महत् ॥४१॥ स्व
सुस्नातं निरुद्योगं कर्तव्यं किं मया वद ॥ शिशवो मां पीडयंति भक्षणार्थं दिने दिने ॥४२॥ चिंतेयं च प्रकर्तव्यं
भक्षणार्थं मया वद ॥ नास्त्येवान्नं गृहे किंचित् धान्यं वाप्यथवा धनं ॥४३॥ किं मया तु प्रकर्तव्यं कुत्र गंतव्यमेव

वा॥ कथं मे लिखतो हृष्टे धात्रा पापेन वै पुरा॥४४॥ मूर्खश्चालससंयुक्तो दरिद्रो निष्ठुरस्तथा॥ स्नेहहीनः
कुटुंबे न व्यसनी श्रवणे सदा॥४५॥ पृथिव्यां दुर्भगैकाहं दरिद्रगृहमागता॥ सौभाग्यदास्ता स्त्रियो लोके यासा
मुयोग्यशालिनः॥४६॥ नपयो धनधान्यादिसमृद्ध्या परिशोभिताः॥ ते वै स्त्रीणां हितकराः शिशुपालनतत्परा
॥४७॥ निर्पंग हेपुतिर्हंति स्त्रीणां संतोषकारकाः॥ सदन्नभक्षणे यत्नं सभाग्या कुर्वते नित्यं॥४८॥ व्यवसायं
